# শ্রীগায়ত্রীসহস্রনামস্তোত্রম্ দেবী ভাগবতাংতর্গত

{॥ শ্রীগায়ত্রীসহস্রনামস্তোত্রম্ দেবী ভাগবতাংতর্গত ॥}

নারদ উবাচ -

ভগবন্সর্বধর্মজ্ঞ সর্বশাস্ত্রবিশারদ ।

শ্রুতিস্মৃতিপুরাণানাং রহস্যং ত্বন্মুখাচ্ছ্রুতম্ ॥ ১॥

সর্বপাপহরং দেব যেন বিদ্যা প্রবর্ততে ।

কেন বা ব্রহ্মবিজ্ঞানং কিং নু বা মোক্ষসাধনম্ ॥ ২॥

ব্রাহ্মণানাং গতিঃ কেন কেন বা মৃত্যু নাশনম্ ।

ঐহিকামুষ্মিকফলং কেন বা পদ্মলোচন ॥ ৩॥

বক্তুমর্হস্যশেষেণ সর্বে নিখিলমাদিতঃ ।

শ্রীনারায়ণ উবাচ -

সাধু সাধু মহাপ্রাজ্ঞ সম্যক্ পৃষ্টং ত্বয়াঽনঘ ॥ ৪॥

শৃণু বক্ষ্যামি যত্নেন গায়ত্র্যষ্টসহস্রকম্ ।

নাম্নাং শুভানাং দিব্যানাং সর্বপাপবিনাশনম্ ॥ ৫॥

সৃষ্ট্যাদৌ যদ্ভগবতা পূর্বে প্রোক্তং ব্রবীমি তে ।

অষ্টোত্তরসহস্রস্য ঋষির্ব্রহ্মা প্রকীর্তিতঃ ॥ ৬॥

ছন্দোঽনুষ্টুপ্তথা দেবী গায়ত্রীং দেবতা স্মৃতা ।
হলোবীজানি তস্যৈব স্বরাঃ শক্তয় ঈরিতাঃ ॥ ৭॥

অঙ্গন্যাসকরন্যাসাবুচ্যেতে মাতৃকাক্ষরৈঃ ।
অথ ধ্যানং প্রবক্ষ্যামি সাধকানাং হিতায বৈ ॥ ৮॥

ধ্যানম্ -
রক্তশ্বেতহিরণ্যনীলধবলৈর্যুক্তা ত্রিনীত্রোজ্জ্বলাং রক্তাং
রক্তনবস্রজং
মণিগণৈর্যুক্তাং কুমারীমিমাম্ ।
গাযত্রীং কমলাসনাং করতলব্যানদ্ধকুণ্ডাম্বুজাং পদ্মাক্ষী
চ
বরস্রজং চ দধতীং হংসাধিরূঢাং ভজে ॥ ৯॥

অচিন্ত্যলক্ষণাব্যক্তাপ্যর্থমাতৃমহেশ্বরী ।
অমৃতার্ণবমধ্যস্থাপ্যজিতা চাপরাজিতা ॥ ১০॥

অণিমাদিগুণাধারাপ্যর্কমণ্ডলসংস্থিতা ।
অজরাজাপরাধর্মা অক্ষসূত্রধরাধরা ॥ ১১॥

অকারাদিক্ষকারান্তাপ্যরিষড্বর্গভেদিনী ।
অঞ্জনাদ্রিপ্রতীকাশাপ্যঞ্জনাদ্রিনিবাসিনী ॥ ১২॥

অদিতিশ্চাজপাবিদ্যাপ্যরবিন্দনিভেক্ষণা ।

অন্তর্বহিঃস্থিতাবিদ্যাধ্বংসিনী চান্তরাত্মিকা ॥ ১৩॥

অজা চাজমুখাবাসাপ্যরবিন্দনিভাননা ।

অর্ধমাত্রার্থদানজ্ঞাপ্যরিমণ্ডলমর্দিনী ॥ ১৪ ॥

অসুরঘ্নী হ্যমাবাস্যাপ্যলক্ষ্মীঘ্ন্যন্ত্যজার্চিতা ।

আদিলক্ষ্মীশ্চাদিশক্তিরাকৃতিশ্চায়তাননা ॥ ১৫॥

আদিত্যপদবীচারাপ্যাদিত্যপরিসেবিতা ।

আচার্যাবর্তনাচারাপ্যাদিমূর্তিনিবাসিনী ॥ ১৬॥

আগ্নেয়ী চামরী চাদ্যা চারাধ্যা চাসনস্থিতা ।

আধারনিলযাধারা চাকাশান্তনিবাসিনী ॥ ১৭॥

আদ্যাক্ষরসমাযুক্তা চান্তরাকাশরূপিণী ।

আদিত্যমণ্ডলগতা চান্তরধ্বান্তনাশিনী ॥ ১৮॥

ইন্দিরা চেষ্টদা চেষ্টা চেন্দীবরনিভেক্ষণা ।

ইরাবতী চেন্দ্রপদা চেন্দ্রাণী চেন্দুরূপিণী ॥ ১৯॥

ইক্ষুকোদণ্ডসংযুক্তা চেষুসংধানকারিণী ।

ইন্দ্রনীলসমাকারা চেডাপিঙ্গলরূপিণী ॥ ২০॥

ইন্দ্রাক্ষীচেশ্বরী দেবী চেহাত্রযবিবর্জিতা ।

উমা চোষা হ্যুডুনিভা উর্বারুকফলাননা ॥ ২১॥

উডুপ্রভা চোডুমতী হ্যুডুপা হ্যুডুমধ্যগা ।

ঊর্ধ্বা চাপ্যূর্ধ্বকেশী চাপ্যূর্ধ্বাধোগতিভেদিনী ॥ ২২॥

ঊর্ধ্ববাহুপ্রিযা চোর্মিমালাবাগ্গ্রন্থদাযিনী ।

ঋতং চর্ষিরৃতুমতী ঋষিদেবনমস্কৃতা ॥ ২৩॥

ঋগ্বেদা ঋণহর্ত্রী চ ঋষিমণ্ডলচারিণী ।

ঋদ্ধিদা ঋজুমার্গস্থা ঋজুধর্মা ঋতুপ্রদা ॥ ২৪॥

ঋগ্বেদনিলযা ঋজ্বী লুপ্তধর্মপ্রবর্তিনী ।

লূতারিবরসম্ভূতা লূতাদিবিষহারিণী ॥ ২৫॥

একাক্ষরা চৈকমাত্রা চৈকা চৈকৈকনিষ্ঠিতা ।

ঐন্দ্রী হ্যৈরাবতারূঢা চৈহিকামুষ্মিকপ্রদা ॥ ২৬॥

ওংকারা হ্যোষধী চোতা চোতপ্রোতনিবাসিনী ।

ঔর্বা হ্যৌষধসম্পন্না ঔপাসনফলপ্রদা ॥ ২৭॥

অণ্ডমধ্যস্থিতা দেবী চাঃকারমনুরূপিণী ।
কাত্যাযনী কালরাত্রিঃ কামাক্ষী কামসুন্দরী ॥ ২৮॥

কমলা কামিনী কান্তা কামদা কালকণ্ঠিনী ।
করিকুম্ভস্তনভরা করবীরসুবাসিনী ॥ ২৯॥

কল্যাণী কুণ্ডলবতী কুরুক্ষেত্রনিবাসিনী ।
কুরুবিন্দদলাকারা কুণ্ডলী কুমুদালযা ॥ ৩০॥

কালজিহ্বা করালাস্যা কালিকা কালরূপিণী ।
কমনীযগুণা কান্তিঃ কলাধারা কুমুদ্বতী ॥ ৩১॥

কৌশিকী কমলাকারা কামচারপ্রভঞ্জিনী ।
কৌমারী করুণাপাঙ্গী ককুবন্তা করিপ্রিযা ॥ ৩২॥

কেসরী কেশবনুতা কদম্বকুসুমপ্রিযা ।
কালিন্দী কালিকা কাঞ্চী কলশোদ্ভবসংস্তুতা ॥ ৩৩॥

কামমাতা ক্রতুমতী কামরূপা কৃপাবতী ।
কুমারী কুণ্ডনিলযা কিরাতী কীরবাহনা ॥ ৩৪॥

কৈকেযী কোকিলালাপা কেতকী কুসুমপ্রিযা ।

কমণ্ডলুধরা কালী কর্মনির্মূলকারিণী ॥ ৩৫॥

কলহংসগতিঃ কক্ষা কৃতকৌতুকমঙ্গলা ।
কস্তূরীতিলকা কম্প্রা করীন্দ্রগমনা কুহূঃ ॥ ৩৬॥

কর্পূরলেপনা কৃষ্ণা কপিলা কুহরাশ্রয়া ।
কূটস্থা কুধরা কম্রা কুক্ষিস্থাখিলবিষ্টপা ॥ ৩৭॥

খড্গখেটকরা খর্বা খেচরী খগবাহনা ।
খট্বাঙ্গধারিণী খ্যাতা খগরাজোপরিস্থিতা ॥ ৩৮॥

খলঘ্নী খণ্ডিতজরা খণ্ডাখ্যানপ্রদায়িনী ।
খণ্ডেন্দুতিলকা গঙ্গা গণেশগুহপূজিতা ॥ ৩৯॥

গায়ত্রী গোমতী গীতা গান্ধারী গানলোলুপা ।
গৌতমী গামিনী গাধা গন্ধর্বাপ্সরসেবিতা ॥ ৪০॥

গোবিন্দচরণাক্রান্তা গুণত্রয়বিভাবিতা ।
গন্ধর্বী গহ্বরী গোত্রা গিরীশা গহনা গমী ॥ ৪১॥

গুহাবাসা গুণবতী গুরুপাপপ্রণাশিনী ।
গুর্বী গুণবতী গুহ্যা গোপ্তব্যা গুণদায়িনী ॥ ৪২॥

গিরিজা গুহ্যমাতঙ্গী গরুডধ্বজবল্লভা ।
গর্বাপহারিণী গোদা গোকুলস্থা গদাধরা ॥ ৪৩॥

গোকর্ণনিলযাসক্তা গুহ্যমণ্ডলবর্তিনী ।
ঘর্মদা ঘনদা ঘণ্টা ঘোরদানবমর্দিনী ॥ ৪৪॥

ঘৃণিমন্ত্রমযী ঘোষা ঘনসম্পাতদাযিনী ।
ঘণ্টারবপ্রিযা ঘ্রাণা ঘৃণিসংতুষ্টকারিণী ॥ ৪৫॥

ঘনারিমণ্ডলা ঘূর্ণা ঘৃতাচী ঘনবেগিনী ।
জ্ঞানধাতুমযী চর্চা চর্চিতা চারুহাসিনী ॥ ৪৬॥

চটুলা চণ্ডিকা চিত্রা চিত্রমাল্যবিভূষিতা ।
চতুর্ভুজা চারুদন্তা চাতুরী চরিতপ্রদা ॥ ৪৭॥

চূলিকা চিত্রবস্ত্রান্তা চন্দ্রমঃকর্ণকুণ্ডলা ।
চন্দ্রহাসা চারুদাত্রী চকোরী চন্দ্রহাসিনী ॥ ৪৮॥

চন্দ্রিকা চন্দ্রধাত্রী চ চৌরী চৌরা চ চণ্ডিকা ।
চঞ্চদ্বাগ্বাদিনী চন্দ্রচূডা চোরবিনাশিনী ॥ ৪৯॥

চারুচন্দনলিপ্তাঙ্গী চঞ্চচ্চামরবীজিতা ।

চারুমধ্যা চারুগতিশ্চন্দিলা চন্দ্ররূপিণী ॥ ৫০॥

চারুহোমপ্রিযা চার্বাচরিতা চক্রবাহুকা ।

চন্দ্রমণ্ডলমধ্যস্থা চন্দ্রমণ্ডলদর্পণা ॥ ৫১॥

চক্রবাকস্তনী চেষ্টা চিত্রা চারুবিলাসিনী ।

চিৎস্বরূপা চন্দ্রবতী চন্দ্রমাশ্চন্দনপ্রিযা ॥ ৫২॥

চোদযিত্রী চিরপ্রজ্ঞা চাতকা চারুহেতুকী ।

ছত্রযাতা ছত্রধরা ছাযা ছন্দঃপরিচ্ছদা ॥ ৫৩॥

ছাযাদেবী ছিদ্রনখা ছন্নেন্দ্রিযবিসর্পিণী ।

ছন্দোঽনুষ্টুপ্প্রতিষ্ঠান্তা ছিদ্রোপদ্রবভেদিনী ॥ ৫৪॥

ছেদা ছত্রেশ্বরী ছিন্না ছুরিকা ছেদনপ্রিযা ।

জননী জন্মরহিতা জাতবেদা জগন্মযী ॥ ৫৫॥

জাহ্নবী জটিলা জেত্রী জরামরণবর্জিতা ।

জম্বূদ্বীপবতী জ্বালা জযন্তী জলশালিনী ॥ ৫৬॥

জিতেন্দ্রিযা জিতক্রোধা জিতামিত্রা জগৎপ্রিযা ।

জাতরূপমযী জিহ্বা জানকী জগতী জরা ॥ ৫৭॥

জনিত্রী জহ্নুতনযা জগত্রযহিতৈষিণী ।

জ্বালামুখী জপবতী জ্বরঘ্নী জিতবিষ্টপা ॥ ৫৮॥

জিতাক্রান্তমযী জ্বালা জাগ্রতী জ্বরদেবতা ।

জ্বলন্তী জলদা জ্যেষ্ঠা জ্যাঘোষাস্ফোটদিঙ্মুখী ॥ ৫৯॥

জম্ভিনী জৃম্ভণা জৃম্ভা জ্বলন্মাণিক্যকুণ্ডলা ।

ঝিংঝিকা ঝণনির্ঘোষা ঝংঝামারুতবেগিনী ॥ ৬০॥

ঝল্লরীবাদ্যকুশলা ঞরূপা ঞভুজা স্মৃতা ।

টঙ্কবাণসমাযুক্তা টঙ্কিনী টঙ্কভেদিনী ॥ ৬১॥

টঙ্কীগণকৃতাঘোষা টঙ্কনীযমহোরসা ।

টঙ্কারকারিণী দেবী ঠঠশব্দনিনাদিনী ॥ ৬২॥

ডামরী ডাকিনী ডিম্ভা ডুণ্ডমারৈকনির্জিতা ।

ডামরীতন্ত্রমার্গস্থা ডমড্ডমরুনাদিনী ॥ ৬৩॥

ডিণ্ডীরবসহা ডিম্ভলসৎক্রীডাপরাযণা ।

ঢুণ্ঢিবিঘ্নেশজননী ঢক্কাহস্তা ঢিলিব্রজা ॥ ৬৪॥

নিত্যজ্ঞানা নিরুপমা নির্গুণা নর্মদা নদী ।

ত্রিগুণা ত্রিপদা তন্ত্রী তুলসী তরুণা তরুঃ ॥ ৬৫॥

ত্রিবিক্রমপদাক্রান্তা তুরীযপদগামিনী ।

তরুণাদিত্যসংকাশা তামসী তুহিনা তুরা ॥ ৬৬॥

ত্রিকালজ্ঞানসম্পন্না ত্রিবলী চ ত্রিলোচনা ।

ত্রিশক্তিস্ত্রিপুরা তুঙ্গা তুরঙ্গবদনা তথা ॥ ৬৭॥

তিমিঙ্গিলগিলা তীব্রা ত্রিস্রোতা তামসাদিনী ।

তন্ত্রমন্ত্রবিশেষজ্ঞা তনুমধ্যা ত্রিবিষ্টপা ॥ ৬৮॥

ত্রিসন্ধ্যা ত্রিস্তনী তোষাসংস্থা তালপ্রতাপিনী ।

তাটঙ্কিনী তুষারাভা তুহিনাচলবাসিনী ॥ ৬৯॥

তন্তুজালসমাযুক্তা তারহারাবলিপ্রিযা ।

তিলহোমপ্রিযা তীর্থা তমালকুসুমাকৃতিঃ ॥ ৭০॥

তারকা ত্রিযুতা তন্বী ত্রিশঙ্কুপরিবারিতা ।

তলোদরী তিলাভূষা তাটঙ্কপ্রিযবাদিনী ॥ ৭১॥

ত্রিজটা তিত্তিরী তৃষ্ণা ত্রিবিধা তরুণাকৃতিঃ ।

তপ্তকাঞ্চনসংকাশা তপ্তকাঞ্চনভূষণা ॥ ৭২॥

ত্রৈয়ম্বকা ত্রিবর্গা চ ত্রিকালজ্ঞানদায়িনী ।

তর্পণা তৃপ্তিদা তৃপ্তা তামসী তুম্বুরুস্তুতা ॥ ৭৩॥

তার্ক্ষ্যস্থা ত্রিগুণাকারা ত্রিভঙ্গী তনুবল্লরিঃ ।

থাৎকারী থারবা থান্তা দোহিনী দীনবৎসলা ॥ ৭৪ ॥

দানবান্তকরী দুর্গা দুর্গাসুরনিবর্হিণী ।

দেবরীতির্দিবারাত্রির্দ্রৌপদী দুন্দুভিস্বনা ॥ ৭৫॥

দেবযানী দুরাবাসা দারিদ্র্যোদ্ভেদিনী দিবা ।

দামোদরপ্রিয়া দীপ্তা দিগ্বাসা দিগ্বিমোহিনী ॥ ৭৬॥

দণ্ডকারণ্যনিলয়া দণ্ডিনী দেবপূজিতা ।

দেববন্দ্যা দিবিষদা দ্বেষিণী দানবাকৃতিঃ ॥ ৭৭॥

দীনানাথস্তুতা দীক্ষা দৈবতাদিস্বরূপিণী ।

ধাত্রী ধনুর্ধরা ধেনুর্ধারিণী ধর্মচারিণী ॥ ৭৮॥

ধরন্ধরা ধরাধারা ধনদা ধান্যদোহিনী ।

ধর্মশীলা ধনাধ্যক্ষা ধনুর্বেদবিশারদা ॥ ৭৯॥

ধৃতির্ধন্যা ধৃতপদা ধর্মরাজপ্রিয়া ধ্রুবা ।

ধূমাবতী ধূমকেশী ধর্মশাস্ত্রপ্রকাশিনী ॥ ৮০॥

নন্দা নন্দপ্রিয়া নিদ্রা নৃনুতা নন্দনাত্মিকা ।

নর্মদা নলিনী নীলা নীলকণ্ঠসমাশ্রয়া ॥ ৮১॥

নারায়ণপ্রিয়া নিত্যা নির্মলা নির্গুণা নিধিঃ ।

নিরাধারা নিরুপমা নিত্যশুদ্ধা নিরঞ্জনা ॥ ৮২॥

নাদবিন্দুকলাতীতা নাদবিন্দুকলাত্মিকা ।

নৃসিংহিনী নগধরা নৃপনাগবিভূষিতা ॥ ৮৩॥

নরকক্লেশশমনী নারায়ণপদোদ্ভবা ।

নিরবদ্যা নিরাকারা নারদপ্রিয়কারিণী ॥ ৮৪॥

নানাজ্যোতিঃ সমাখ্যাতা নিধিদা নির্মলাত্মিকা ।

নবসূত্রধরা নীতির্নিরুপদ্রবকারিণী ॥ ৮৫॥

নন্দজা নবরত্নাঢ্যা নৈমিষারণ্যবাসিনী ।

নবনীতপ্রিয়া নারী নীলজীমূতনিস্বনা ॥ ৮৬॥

নিমেষিণী নদীরূপা নীলগ্রীবা নিশীশ্বরী ।

নামাবলির্নিশুম্ভঘ্নী নাগলোকনিবাসিনী ॥ ৮৭॥

নবজাম্বূনদপ্রখ্যা নাগলোকাধিদেবতা ।

নূপুরাক্রান্তচরণা নরচিত্তপ্রমোদিনী ॥ ৮৮॥

নিমগ্নারক্তনয়না নির্ঘাতসমনিস্বনা ।

নন্দনোদ্যাননিলয়া নির্ব্যূহোপরিচারিণী ॥ ৮৯॥

পার্বতী পরমোদারা পরব্রহ্মাত্মিকা পরা ।

পঞ্চকোশবিনির্মুক্তা পঞ্চপাতকনাশিনী ॥ ৯০॥

পরচিত্তবিধানজ্ঞা পঞ্চিকা পঞ্চরূপিণী ।

পূর্ণিমা পরমা প্রীতিঃ পরতেজঃ প্রকাশিনী ॥ ৯১॥

পুরাণী পৌরুষী পুণ্যা পুণ্ডরীকনিভেক্ষণা ।

পাতালতলনির্মগ্না প্রীতা প্রীতিবিবর্ধিনী ॥ ৯২॥

পাবনী পাদসহিতা পেশলা পবনাশিনী ।

প্রজাপতিঃ পরিশ্রান্তা পর্বতস্তনমণ্ডলা ॥ ৯৩॥

পদ্মপ্রিয়া পদ্মসংস্থা পদ্মাক্ষী পদ্মসম্ভবা ।

পদ্মপত্রা পদ্মপদা পদ্মিনী প্রিয়ভাষিণী ॥ ৯৪॥

পশুপাশবিনির্মুক্তা পুরন্ধ্রী পুরবাসিনী ।

পুষ্কলা পুরুষা পর্বা পারিজাতসুমপ্রিয়া ॥ ৯৫॥

পতিব্রতা পবিত্রাঙ্গী পুষ্পহাসপরাযণা ।
প্রজ্ঞাবতীসুতা পৌত্রী পুত্রপূজ্যা পযস্বিনী ॥ ৯৬॥

পট্টিপাশধরা পঙ্ক্তিঃ পিতৃলোকপ্রদাযিনী ।
পুরাণী পুণ্যশীলা চ প্রণতার্তিবিনাশিনী ॥ ৯৭॥

প্রদ্যুম্নজননী পুষ্টা পিতামহপরিগ্রহা ।
পুণ্ডরীকপুরাবাসা পুণ্ডরীকসমাননা ॥ ৯৮॥

পৃথুজঙ্ঘা পৃথুভুজা পৃথুপাদা পৃথূদরী ।
প্রবালশোভা পিঙ্গাক্ষী পীতবাসাঃ প্রচাপলা ॥ ৯৯॥

প্রসবা পুষ্টিদা পুণ্যা প্রতিষ্ঠা প্রণবাগতিঃ ।
পঞ্চবর্ণা পঞ্চবাণী পঞ্চিকা পঞ্চরস্থিতা ॥ ১০০॥

পরমাযা পরজ্যোতিঃ পরপ্রীতিঃ পরাগতিঃ ।
পরাকাষ্ঠা পরেশানী পাবিনী পাবকদ্যুতিঃ ॥ ১০১॥

পুণ্যভদ্রা পরিচ্ছেদ্যা পুষ্পহাসা পৃথূদরী ।
পীতাঙ্গী পীতবসনা পীতশয্যা পিশাচিনী ॥ ১০২॥

পীতক্রিয়া পিশাচঘ্নী পাটলাক্ষী পটুক্রিয়া ।

পঞ্চভক্ষপ্রিয়াচারা পূতনাপ্রাণঘাতিনী ॥ ১০৩॥

পুন্নাগবনমধ্যস্থা পুণ্যতীর্থনিষেবিতা ।

পঞ্চাঙ্গী চ পরাশক্তিঃ পরমাহ্লাদকারিণী ॥ ১০৪॥

পুষ্পকাণ্ডস্থিতা পূষা পোষিতাখিলবিষ্টপা ।

পানপ্রিয়া পঞ্চশিখা পন্নগোপরিশায়িনী ॥ ১০৫॥

পঞ্চমাত্রাত্মিকা পৃথ্বী পথিকা পৃথুদোহিনী ।

পুরাণন্যায়মীমাংসা পাটলী পুষ্পগন্ধিনী ॥ ১০৬॥

পুণ্যপ্রজা পারদাত্রী পরমার্গৈকগোচরা ।

প্রবালশোভা পূর্ণাশা প্রণবা পল্লবোদরী ॥ ১০৭॥

ফলিনী ফলদা ফল্গুঃ ফূৎকারী ফলকাকৃতিঃ ।

ফণীন্দ্রভোগশয়না ফণিমণ্ডলমণ্ডিতা ॥ ১০৮॥

বালবালা বহুমতা বালাতপনিভাংশুকা ।

বলভদ্রপ্রিয়া বন্দ্যা বডবা বুদ্ধিসংস্তুতা ॥ ১০৯॥

বন্দীদেবী বিলবতী বডিশঘ্নী বলিপ্রিয়া ।

বান্ধবী বোধিতা বুদ্ধির্বন্ধূককুসুমপ্রিয়া ॥ ১১০॥

বালভানুপ্রভাকারা ব্রাহ্মী ব্রাহ্মণদেবতা ।

বৃহস্পতিস্তুতা বৃন্দা বৃন্দাবনবিহারিণী ॥ ১১১॥

বালাকিনী বিলাহারা বিলবাসা বহূদকা ।

বহুনেত্রা বহুপদা বহুকর্ণাবতংসিকা ॥ ১১২॥

বহুবাহুযুতা বীজরূপিণী বহুরূপিণী ।

বিন্দুনাদকলাতীতা বিন্দুনাদস্বরূপিণী ॥ ১১৩॥

বদ্ধগোধাঙ্গুলিত্রাণা বদর্যাশ্রমবাসিনী ।

বৃন্দারকা বৃহৎস্কন্ধা বৃহতী বাণপাতিনী ॥ ১১৪॥

বৃন্দাধ্যক্ষা বহুনুতা বনিতা বহুবিক্রমা ।

বদ্ধপদ্মাসনাসীনা বিল্বপত্রতলস্থিতা ॥ ১১৫॥

বোধিদ্রুমনিজাবাসা বডিস্থা বিন্দুদর্পণা ।

বালা বাণাসনবতী বডবানলবেগিনী ॥ ১১৬॥

ব্রহ্মাণ্ডবহিরন্তঃস্থা ব্রহ্মকঙ্কণসূত্রিণী ।

ভবানী ভীষণবতী ভাবিনী ভয়হারিণী ॥ ১১৭॥

ভদ্রকালী ভুজঙ্গাক্ষী ভারতী ভারতাশয়া ।

ভৈরবী ভীষণাকারা ভূতিদা ভূতিমালিনী ॥ ১১৮॥

ভামিনী ভোগনিরতা ভদ্রদা ভূরিবিক্রমা ।

ভূতবাসা ভৃগুলতা ভার্গবী ভূসুরার্চিতা ॥ ১১৯॥

ভাগীরথী ভোগবতী ভবনস্থা ভিষগ্বরা ।

ভামিনী ভোগিনী ভাষা ভবানী ভূরিদক্ষিণা ॥ ১২০॥

ভর্গাত্মিকা ভীমবতী ভববন্ধবিমোচিনী ।

ভজনীয়া ভূতধাত্রীরঞ্জিতা ভুবনেশ্বরী ॥ ১২১॥

ভুজঙ্গবলয়া ভীমা ভেরুণ্ডা ভাগধেয়িনী ।

মাতা মায়া মধুমতী মধুজিহ্বা মধুপ্রিয়া ॥ ১২২॥

মহাদেবী মহাভাগা মালিনী মীনলোচনা ।

মায়াতীতা মধুমতী মধুমাংসা মধুদ্রবা ॥ ১২৩॥

মানবী মধুসম্ভূতা মিথিলাপুরবাসিনী ।

মধুকৈটভসংহর্ত্রী মেদিনী মেঘমালিনী ॥ ১২৪॥

মন্দোদরী মহামায়া মৈথিলী মসৃণপ্রিয়া ।

**Stotram Digitalized By [Sanskritdocuments.org]**

মহালক্ষ্মীর্মহাকালী মহাকন্যা মহেশ্বরী ॥ ১২৫॥

মাহেন্দ্রী মেরুতনযা মন্দারকুসুমার্চিতা ।

মঞ্জুমঞ্জীরচরণা মোক্ষদা মঞ্জুভাষিণী ॥ ১২৬॥

মধুরদ্রাবিণী মুদ্রা মলযা মলযান্বিতা ।

মেধা মরকতশ্যামা মাগধী মেনকাত্মজা ॥ ১২৭॥

মহামারী মহাবীরা মহাশ্যামা মনুস্তুতা ।

মাতৃকা মিহিরাভাসা মুকুন্দপদবিক্রমা ॥ ১২৮॥

মূলাধারস্থিতা মুগ্ধা মণিপূরকবাসিনী ।

মৃগাক্ষী মহিষারূঢা মহিষাসুরমর্দিনী ॥ ১২৯॥

যোগাসনা যোগগম্যা যোগা যৌবনকাশ্রযা ।

যৌবনী যুদ্ধমধ্যস্থা যমুনা যুগধারিণী ॥ ১৩০॥

যক্ষিণী যোগযুক্তা চ যক্ষরাজপ্রসূতিনী ।

যাত্রা যানবিধানজ্ঞা যদুবংশসমুদ্ভবা ॥ ১৩১॥

যকারাদিহকারান্তা যাজুষী যজ্ঞরূপিণী ।

যামিনী যোগনিরতা যাতুধানভযঙ্করী ॥ ১৩২॥

রুক্মিণী রমণী রামা রেবতী রেণুকা রতিঃ ।
রৌদ্রী রৌদ্রপ্রিযাকারা রামমাতা রতিপ্রিযা ॥ ১৩৩॥

রোহিণী রাজ্যদা রেবা রমা রাজীবলোচনা ।
রাকেশী রূপসম্পন্না রত্নসিংহাসনস্থিতা ॥ ১৩৪॥

রক্তমাল্যাম্বরধরা রক্তগন্ধানুলেপনা ।
রাজহংসসমারূঢা রম্ভা রক্তবলিপ্রিযা ॥ ১৩৫॥

রমণীযযুগাধারা রাজিতাখিলভূতলা ।
রুরুচর্মপরীধানা রথিনী রত্নমালিকা ॥ ১৩৬॥

রোগেশী রোগশমনী রাবিণী রোমহর্ষিণী ।
রামচন্দ্রপদাক্রান্তা রাবণচ্ছেদকারিণী ॥ ১৩৭॥

রত্নবস্ত্রপরিচ্ছন্না রথস্থা রুক্মভূষণা ।
লজ্জাধিদেবতা লোলা ললিতা লিঙ্গধারিণী ॥ ১৩৮॥

লক্ষ্মীর্লোলা লুপ্তবিষা লোকিনী লোকবিশ্রুতা ।
লজ্জা লম্বোদরী দেবী ললনা লোকধারিণী ॥ ১৩৯॥

বরদা বন্দিতা বিদ্যা বৈষ্ণবী বিমলাকৃতিঃ ।

বারাহী বিরজা বর্ষা বরলক্ষ্মীর্বিলাসিনী ॥ ১৪০॥

বিনতা ব্যোমমধ্যস্থা বারিজাসনসংস্থিতা ।

বারুণী বেণুসম্ভূতা বীতিহোত্রা বিরূপিণী ॥ ১৪১॥

বায়ুমণ্ডলমধ্যস্থা বিষ্ণুরূপা বিধিপ্রিয়া ।

বিষ্ণুপত্নী বিষ্ণুমতী বিশালাক্ষী বসুন্ধরা ॥ ১৪২॥

বামদেবপ্রিয়া বেলা বজ্রিণী বসুদোহিনী ।

বেদাক্ষরপরীতাঙ্গী বাজপেযফলপ্রদা ॥ ১৪৩॥

বাসবী বামজননী বৈকুণ্ঠনিলযা বরা ।

ব্যাসপ্রিয়া বর্মধরা বাল্মীকিপরিসেবিতা ॥ ১৪৪॥

শাকম্ভরী শিবা শান্তা শরদা শরণাগতিঃ ।

শাতোদরী শুভাচারা শুম্ভাসুরবিমর্দিনী ॥ ১৪৫॥

শোভাবতী শিবাকারা শংকরার্ধশরীরিণী ।

শোণা শুভাশযা শুভ্রা শিরঃসন্ধানকারিণী ॥ ১৪৬॥

শরাবতী শরানন্দা শরজ্জ্যোৎস্না শুভাননা ।

শরভা শূলিনী শুদ্ধা শবরী শুকবাহনা ॥ ১৪৭॥

শ্রীমতী শ্রীধরানন্দা শ্রবণানন্দদায়িনী ।

শর্বাণী শর্বরীবন্দ্যা ষড্ভাষা ষড়্তুপ্রিয়া ॥ ১৪৮॥

ষডাধারস্থিতা দেবী ষণ্মুখপ্রিয়কারিণী ।

ষডঙ্গরূপসুমতিসুরাসুরনমস্কৃতা ॥ ১৪৯॥

সরস্বতী সদাধারা সর্বমঙ্গলকারিণী ।

সামগানপ্রিয়া সূক্ষ্মা সাবিত্রী সামসম্ভবা ॥ ১৫০॥

সর্বাবাসা সদানন্দা সুস্তনী সাগরাম্বরা ।

সর্বৈশ্বর্যপ্রিয়া সিদ্ধিঃ সাধুবন্ধুপরাক্রমা ॥ ১৫১॥

সপ্তর্ষিমণ্ডলগতা সোমমণ্ডলবাসিনী ।

সর্বজ্ঞা সান্দ্রকরুণা সমানাধিকবর্জিতা ॥ ১৫২॥

সর্বোত্তুঙ্গা সঙ্গহীনা সদ্গুণা সকলেষ্টদা ।

সরধা সূর্যতনয়া সুকেশী সোমসংহতিঃ ॥ ১৫৩॥

হিরণ্যবর্ণা হরিণী হ্রীংকারী হংসবাহিনী ।

ক্ষৌমবস্ত্রপরীতাঙ্গী ক্ষীরাব্ধিতনয়া ক্ষমা ॥ ১৫৪॥

গায়ত্রী চৈব সাবিত্রী পার্বতী চ সরস্বতী ।

বেদগর্ভা বরারোহা শ্রীগাযত্রী পরাম্বিকা ॥ ১৫৫॥

ইতি সাহস্রকং নাম্নাং গাযত্র্যাশ্চৈব নারদ ।
পুণ্যদং সর্বপাপঘ্নং মহাসম্পত্তিদাযকম্ ॥ ১৫৬॥

এবং নামানি গাযত্র্যাস্তোষোৎপত্তিকরাণি হি ।
অষ্টম্যাং চ বিশেষেণ পঠিতব্যং দ্বিজৈঃ সহ ॥ ১৫৭॥

জপং কৃত্বাহূম পূজাধ্যানং কৃত্বা বিশেষতঃ ।
যস্মৈ কস্মৈ ন দাতব্যং গাযত্র্যাস্তু বিশেষতঃ ॥ ১৫৮॥

সুভক্তায সুশিষ্যায বক্তব্যং ভূসু রায বৈ ।
ভ্রষ্টেভ্যঃ সাধকেভ্যশ্চ বান্ধবেভ্যো ন দর্শযেত্ ॥ ১৫৯॥

যদ্গৃহে লিখিতং শাস্ত্রং ভযং তস্য ন কস্যচিত্ ।
চঞ্চলাপিস্থিরা ভূত্বা কমলা তত্র তিষ্ঠতি ॥ ১৬০॥

ইদং রহস্যং পরমং গুহ্যাদ্গুহ্যতরং মহত্ ।
পুণ্যপ্রদং মনুষ্যাণাং দরিদ্রাণাংনিধিপ্রদম্ ॥ ১৬১॥

মোক্ষপ্রদং মুমুক্ষূণাং কামিনাং সর্বকামদম্ ।
রোগাদ্বৈ মুচ্যতে রোগী বদ্ধো মুচ্যেত বন্ধনাত্ ॥ ১৬২॥

ব্রহ্মহত্যা সুরাপানং সুবর্ণস্তেযিনো নরাঃ ।

গুরুতল্পগতো বাপি পাতকাত্মুচ্যতে সকৃত্ ॥ ১৬৩॥

অসৎপ্রতিগ্রহাচ্চৈবাঽভক্ষ্যভক্ষাদ্বিশেষতঃ ।

পাখণ্ডানৃত্যমুখ্যভ্যঃ পাঠনাদেব মুচ্যতে ॥ ১৬৪ ॥

ইদং রহস্যমমলং মযোক্তং পদ্মজোদ্ভব ।

ব্রহ্মসাযুজ্যদং নৃনাং সত্যং সন্ত্য ন সংশয ॥ ১৬৫ ॥

॥ ইতি শ্রীদেবীভাগবতে মহাপুরাণে দ্বাদশস্কন্ধে

গাযত্রীসহস্রনাম স্তোত্রকথনং নাম ষষ্ঠোঽধ্যাযঃ ॥

Encoded by Kirk Wortman kirkwort@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Gayatri Sahasranama Stotram 1 ( From Devi Bhagavatam ) Lyrics in Bengali PDF
% File name : gaayatrisahasradevi.itx
% Category : sahasranAma
% Location : doc_devii

% Language : Sanskrit
% Subject : hinduism/religion
% Transliterated by : Kirk Wortman"
% Proofread by : Kirk Wortman"
% Description-comments : from devI bhAgavatam
% Latest update : August 13, 2002
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website